श्री गायत्री कवचं

श्री गायत्री कवचं

श्रीगणेशाय नमः |
याज्ञवल्क्य उवाच |
स्वामिन् सर्वजगन्नाथ संशयोऽस्ति महान्मम |
चतुःषष्ठिकलानं च पातकानां च तद्वद || 1||

मुच्यते केन पुण्येन ब्रह्मरूपं कथं भवेत् |
देहं च देवतारूपं मंत्ररूपं विशेषतः || 2||

क्रमतः श्रोतुमिच्छामि कवचं विधिपूर्वकं |
ब्रह्मोवाच |
गायत्र्याः कवचस्यास्य ब्रह्मा विष्णुः शिवो ऋषिः || 3||

ऋग्यजुःसामाथर्वाणि छंदांसि परिकीर्तिताः |
परब्रह्मस्वरूपा सा गायत्री देवता स्मृता || 4||

रक्षाहीनं तु यत्स्थानं कवचेन विना कृतं |
सर्वं सर्वत्र संरक्षेत्सर्वांगं भुवनेश्वरी || 5||

बीजं भर्गश्च युक्तिश्च धियः कीलकमेव च |
पुरुषार्थविनियोगो यो नश्च परिकीर्त्तितः || 6||

ऋषिं मूर्ध्नि न्यसेत्पूर्वं मुखे छंद उदीरितं |
देवतां हृदि विन्यस्य गुह्ये बीजं नियोजयेत् || 7||

शक्तिं विन्यस्य पदयोर्नाभौ तु कीलकं न्यसेत् |
द्वात्रिंशत्तु महाविद्याः सांख्यायनसगोत्रजाः || 8||

द्वादशलक्षसंयुक्ता विनियोगाः पृथक्पृथक् |
एवं न्यासविधिं कृत्वा करांगं विधिपूर्वकं || 9||

व्याहृतित्रयमुच्चार्य ह्यनुलोमविलोमतः |
चतुरक्षरसंयुक्तं करांगन्यासमाचरेत् || 10||

आवाहनादिभेदं च दश मुद्राः प्रदर्शयेत् |
सा पातु वरदा देवी अंगप्रत्यंगसंगमे || 11||

ध्यानं मुद्रां नमस्कारं गुरुमंत्रं तथैव च |
संयोगमात्मसिद्धिं च षड्विधं किं विचारयेत् || 12||

अस्य श्रीगायत्रीकवचस्य ब्रह्मविष्णुरुद्रा ऋषयः,
ऋग्यजुःसामाथर्वाणि छंदांसि, परब्रह्मस्वरूपिणी
गायत्री देवता, भूर्बीजं, भुवः शक्तिः, स्वाहा कीलकं,
श्रीगायत्रीप्रीत्यर्थे जपे विनियोगः ||

ॐ भूर्भुवः स्वः तत्सवितुरिति हृदयाय नमः |
ॐ भूर्भुवः स्वः वरेण्यमिति शिरसे स्वाहा |
ॐ भूर्भुवः स्वः भर्गो देवस्येति शिखायै वषट् |
ॐ भूर्भुवः स्वः धीमहीति कवचाय हुं |
ॐ भूर्भुवः स्वः धियो यो नः इति नेत्रत्रयाय वौषट् |
ॐ भूर्भुवः स्वः प्रचोदयादिति अस्त्राय फट् ||

वर्णास्त्रां कुंडिकाहस्तां शुद्धनिर्मलज्योतिषीम्म् |
सर्वतत्त्वमयीं वंदे गायत्रीं वेदमातरं || 13||

अथ ध्यानं |
मुक्ता विद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणै-
र्युक्तामिंदुनिबद्धरत्नमुकुटां तत्त्वार्थवर्णात्मिकां |
गायत्रीं वरदाभयांकुशकशां शूलं कपालं गुणं
शंखं चक्रमथारविंदयुगलं हस्तैर्वहंतीं भजे || 14||

ॐ गायत्री पूर्वतः पातु सावित्री पातु दक्षिणे |
ब्रह्मविद्या च मे पश्चादुत्तरे मां सरस्वती || 15||

पावकी मे दिशं रक्षेत्पावकोज्ज्वलशालिनी |
यातुधानीं दिशं रक्षेद्यातुधानगणार्दिनी || 16||

पावमानीं दिशं रक्षेत्पवमानविलासिनी |
दिशं रौद्रीमवतु मे रुद्राणी रुद्ररूपिणी || 17||

ऊर्ध्वं ब्रह्माणी मे रक्षेदधस्ताद्वैष्णवी तथा |
एवं दश दिशो रक्षेत् सर्वतो भुवनेश्वरी || 18||

ब्रह्मास्त्रस्मरणादेव वाचां सिद्धिः प्रजायते |
ब्रह्मदंडश्च मे पातु सर्वशस्त्रास्त्रभक्षक्रः || 19||

ब्रह्मशीर्षस्तथा पातु शत्रूणां वधकारकः |
सप्त व्याहृतयः पांतु सर्वदा बिंदुसंयुताः || 20||

वेदमाता च मां पातु सरहस्या सदैवता |
देवीसूक्तं सदा पातु सहस्राक्षरदेवता || 21||

चतुःषष्टिकला विद्या दिव्याद्या पातु देवता |
बीजशक्तिश्च मे पातु पातु विक्रमदेवता || 22||

तत्पदं पातु मे पादौ जंघे मे सवितुःपदं |
वरेण्यं कटिदेशं तु नाभिं भर्गस्तथैव च || 53||

देवस्य मे तु हृदयं धीमहीति गलं तथा |
धियो मे पातु जिह्वायां यःपदं पातु लोचने || 24||

ललाटे नः पदं पातु मूर्धानं मे प्रचोदयात् |
तद्वर्णः पातु मूर्धानं सकारः पातु भालकं || 25||

चक्षुषी मे विकारस्तु श्रोत्रं रक्षेत्तु कारकः |
नासापुटेर्वकारो मे रेकारस्तु कपोलयोः || 26||

णिकारस्त्वधरोष्ठे च यकारस्तूर्ध्व ओष्ठके |
आत्यमध्ये भकारस्तु गोकारस्तु कपोलयोः || 27||

देकारः कंठदेशे च वकारः स्कंधदेशयोः |
स्यकारो दक्षिणं हस्तं धीकारो वामहस्तकं || 28||

मकारो हृदयं रक्षेद्धिकारो जठरं तथा |
धिकारो नाभिदेशं तु योकारस्तु कटिद्वयं || 29||

गुह्यं रक्षतु योकार ऊरू मे नः पदाक्षरं |
प्रकारो जानुनी रक्षेच्चोकारो जंघदेशयोः || 30||

दकारो गुल्फदेशं तु यात्कारः पादयुग्मकं |
जातवेदेति गायत्री त्र्यंबकेति दशाक्षरा || 31||

सर्वतः सर्वदा पातु आपोज्योतीति षोडशी |
इदं तु कवचं दिव्यं बाधाशतविनाशकं || 32||

चतुःषष्ठिकलाविद्यासकलैश्वर्यसिद्धिदं |
जपारंभे च हृदयं जपांते कवचं पठेत् || 33||

स्त्रीगोब्राह्मणमित्रादिद्रोहाद्यखिलपातकैः |
मुच्यते सर्वपापेभ्यः परं ब्रह्माधिगच्छति || 34||

पुष्पांजलिं च गायत्र्या मूलेनैव पठेत्सकृत् |
शतसाहस्रवर्षाणां पूजायाः फलमाप्नुयात् || 35||

भूर्जपत्रे लिखित्वैतत् स्वकंठे धारयेद्यदि |
शिखायां दक्षिणे बाहौ कंठे वा धारयेद्बुधः || 36||

त्रैलोक्यं क्षोभयेत्सर्वं त्रैलोक्यं दहति क्षणात् |
पुत्रवान् धनवान् श्रीमान्नानाविद्यानिधिर्भवेत् || 37||

ब्रह्मास्त्रादीनि सर्वाणि तदंगस्पर्शनात्ततः |
भवंति तस्य तुच्छनि किमन्यत्कथयामि ते || 38||

अभिमंत्रितगायत्रीकवचं मानसं पठेत् |
तज्जलं पिबतो नित्यं पुरश्चर्याफलं भवेत् || 39||

लघुसामान्यकं मंत्रं, महामंत्रं तथैव च |
यो वेत्ति धारणां युंजन्, जीवन्मुक्तः स उच्यते || 40||

सप्ताव्याहृतिविप्रेंद्र सप्तावस्थाः प्रकीर्तिताः |
सप्तजीवशता नित्यं व्याहृती अग्निरूपिणी || 41||

प्रणवे नित्ययुक्तस्य व्याहृतीषु च सप्तसु |
सर्वेषामेव पापानां संकरे समुपस्थिते || 42||

शतं सहस्रमभ्यर्च्य गायत्री पावनं महत् |
दशशतमष्टोत्तरशतं गायत्री पावनं महत् || 43||

भक्तियुक्तो भवेद्विप्रः संध्याकर्म समाचरेत् |
काले काले प्रकर्तव्यं सिद्धिर्भवति नान्यथा || 44||

प्रणवं पूर्वमुद्धृत्य भूर्भुवस्वस्तथैव च |
तुर्यं सहैव गायत्रीजप एवमुदाहृतं || 45||

तुरीयपादमुत्सृज्य गायत्रीं च जपेद्द्विजः |
स मूढो नरकं याति कालसूत्रमधोगतिः || 46||

मंत्रादौ जननं प्रोक्तं मत्रांते मृतसूत्रकं |
उभयोर्दोषनिर्मुक्तं गायत्री सफला भवेत् || 47||

मत्रादौ पाशबीजं च मंत्रांते कुशबीजकं |
मंत्रमध्ये तु या माया गायत्री सफला भवेत् || 48||

वाचिकस्त्वहमेव स्यादुपांशु शतमुच्यते |
सहस्रं मानसं प्रोक्तं त्रिविधं जपलक्षणं || 49||

अक्षमालां च मुद्रां च गुरोरपि न दर्शयेत् |
जपं चाक्षस्वरूभेणानामिकामध्यपर्वणि || 50||

अनामा मध्यया हीना कनिष्ठादिक्रमेण तु |
तर्जनीमूलपर्यंतं गायत्रीजपलक्षणं || 51||

पर्वभिस्तु जपेदेवमन्यत्र नियमः स्मृतः |
गायत्री वेदमूलत्वाद्वेदः पर्वसु गीयते || 52||

दशभिर्जन्मजनितं शतेनैव पुरा कृतं |
त्रियुगं तु सहस्राणि गायत्री हंति किल्बिषं || 53||

प्रातःकालेषु कर्तव्यं सिद्धिं विप्रो य इच्छति |
नादालये समाधिश्च संध्यायां समुपासते || 54||

अंगुल्यग्रेण यज्जप्तं यज्जप्तं मेरुलंघने |
असंख्यया च यज्जप्तं तज्जप्तं निष्फलं भवेत् || 55||

विना वस्त्रं प्रकुर्वीत गायत्री निष्फला भवेत् |
वस्त्रपुच्छं न जानाति वृथा तस्य परिश्रमः || 56||

गायत्रीं तु परित्यज्य अन्यमंत्रमुपासते |
सिद्धान्नं च परित्यज्य भिक्षामटति दुर्मतिः || 57||

ऋषिश्छंदो देवताख्या बीजं शक्तिश्च कीलकं |
नियोगं न च जानाति गायत्री निष्फला भवेत् || 58||

वर्णमुद्राध्यानपदमावाहनविसर्जनं |
दीपं चक्रं न जानाति गायत्री निषफला भवेत् || 59||

शक्तिन्र्यासस्तथा स्थानं मंत्रसंबोधनं परं |
त्रिविधं यो न जानाति गायत्री तस्य निष्फला || 60||

पंचोपचारकांश्चैव होमद्रव्यं तथैव च |
पंचांगं च विना नित्यं गायत्री निष्फला भवेत् || 61||

मंत्रसिद्धिर्भवेज्जातु विश्वामित्रेण भाषिं |
व्यासो वाचस्पतिर्जीवस्तुता देवी तपःस्मृतौ || 62||

सहस्रजप्ता सा देवी ह्युपपातकनाशिनी |
लक्षजाप्ये तथा तच्च महापातकनाशिनी |
कोटिजाप्येन राजेंद्र यदिच्छति तदाप्नुयात् || 63||

न देयं परशिष्येभ्यो ह्यभक्तेभ्यो विशेषतः |
शिष्येभ्यो भक्तियुक्तेभ्यो ह्यन्यथा मृत्युमाप्नुयात् || 64||

इति श्रीमद्वसिष्ठसंहितोक्तं गायत्रीकवचं संपूर्णं ||